पत्राङ्गं, क्ली, (पत्त्रमिव अङ्गं यस्य । यद्वा पत्त्रेषु अङ्गतीति । अगि गतौ + अच् ।) रक्तचन्दनम् । रक्तचन्दनसदृशकाष्ठविशेषः । बकम् इति भाषा । इत्यमरः । २ । ६ । १३२ ॥ भूर्जम् । पद्मकम् । इति मेदिनी ॥

पत्राङ्गुलिः, स्त्री, (पत्त्रं अङ्गुलिरिव यत्र । यद्वा अङ्गुलिभिर्लिखितं रचितं पत्त्रं पत्राकृतिरत्र इति परनिपातत्वात्तथात्वम् ।) पत्त्रभङ्गः । स्तनकपोलादौ कस्तूरिकादिरचितपत्त्रावली । इत्यमरः । २ । ६ । १२२ ॥

पत्राञ्जनं, क्ली, (पत्त्रं लेखनपत्त्रमज्यतेऽनेन । पत्त्र + अञ्ज + करणे ल्युट् ।) मसी । इति शब्दरत्नावली ॥

पत्राढ्यं, क्ली, (पत्त्रैराढ्यम् ।) पिप्पलीमूलम् । पर्व्वततृणम् । इति राजनिर्घण्टः ॥

पत्राम्लं, क्ली, पत्तङ्गम् । इति राजनिर्घण्टः ॥

पत्रालुः, पुं, (पत्त्र + अस्त्यर्थे आलुः ।) काशालुः । इक्षुदर्भा । इति राजनिर्घण्टः ॥

पत्रावलिः, स्त्री, (पत्त्राणां पत्त्राकृतीनां आवलिः पङ्क्तिरिव रचना यस्याः ।) गैरिकम् । इति शब्दचन्द्रिका ॥ (पत्त्राणां आवलिः श्रेणी राजिर्वा ।) पत्त्रश्रेणी च ॥

पत्रावली, स्त्री, (पत्त्रावलि + वा ङीप् ।) पत्त्रभङ्गः । इति शब्दरत्नावली ॥ नवदूर्व्वासम्प्रदानकमधुमिश्रितयवचूर्णयुक्तनवाश्वत्थपत्त्राणि । यथा,—

"अमायां निशि संघे तु मन्त्रे चाश्वत्थसंज्ञके । क्रमात् पत्त्रावली देयं मधुना यवचूर्णकम् ॥"

इति कैवल्यतन्त्रम् ॥

देवादिसन्निधौ सन्दिग्धवस्तुनोरेकतरावधारणार्थकशास्त्रबालकोत्तोलितततत्सन्देहकोटिलिखितपत्त्रसमूहश्च ॥

पत्रिका, स्त्री, (पत्त्री एव । स्वार्थे कन् ततो ह्रस्वः ।) पत्त्री । लिपिः । यथा, ज्योतिषे ।

"आदित्यादिग्रहाः सर्व्वे नक्षत्राणि च राशयः । दीर्घमायुः प्रकुर्व्वन्तु यस्येयं जन्मपत्रिका ॥"

(प्रशस्तपत्त्रं विद्यते यस्याः । पत्त्र + विद्यमानार्थे ठन् । कदल्यादिनवपत्रिका । यथा, दुर्गोत्सवपद्धतौ ।

"कदली दाड़िमी धान्यं हरिद्रा मानकं कचु । बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

पत्रिकाख्यः, पुं, (पत्रिका आख्या यस्य ।) कर्पूरभेदः । इति राजनिर्घण्टः ॥ पत्रिकानामके त्रि ॥

पत्रिणी, स्त्री, (पत्त्राणि सन्त्यस्याः । पत्त्र + इनिः । स्त्रियां ङीप् ।) पल्लवः । इति शब्दचन्द्रिका ॥

पत्री, [न्] पुं, (पत्त्रं पक्षो विद्यतेऽस्य । पत्त्र + इनिः ।) बाणः । (यथा, रघुः । ११ । ८४ ।

"शंस किं गतिमनेन पत्त्रिणा हन्मि लोकसुत ते मखार्ज्जितम् ॥")

पक्षी । इत्यमरः । ३ । ३ । १०५ ॥ (यथा, रघुः ११ । २६ ।

"तं क्षुरप्रशकलीकृतं कृती पत्त्रिणां व्यभजदाश्रमाद्बहिः ॥")

श्येनः । (यथा, नैषधे । १६ । १२ ।

"नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्त्रिणामिह विहरणैः श्येनम्पातां रवेरवधारयन् ॥"

"पत्त्रिणां श्येनाख्यपक्षिरूपाणाम् ।" इति तट्टीकायां नारायणः ॥ पत्त्राणि छदानि सन्त्यस्य । अत इनिः ।) वृक्षः । रथी । पर्व्वतः । इति मेदिनी ॥ तालः । श्वेतकिणिही । गङ्गापत्त्री । पाची । इति राजनिर्घण्टः ॥ पत्त्रविशिष्टे, त्रि ॥

पत्री, स्त्री, (पत्त्र + स्त्रियां ङीप् ।) लिपिः । पत्त्रम् । यथा, जातके ।

"श्रीमत्पङ्कजिनीपतिः कुमुदिनीप्राणेश्वरो भूभवः

शाशाङ्किः सुरराजवन्दितपदो दैत्येन्द्रमन्त्री शनिः । स्वर्भानुः शिखिनां गणो गणपतिर्ब्रह्मेशलक्ष्मीधराः सर्व्वे रक्षन्तु सदैव यस्य विमला पत्त्री मया लिख्यते ॥"

पत्रोपस्करः, पुं, (पत्त्रमेव उपस्करः उपकरणं यस्य ।) कासमर्द्दः । इति हारावली ॥

पत्रोर्णं, क्ली, (पत्त्रजा ऊर्णा साधनत्वेनास्त्यस्य । "अर्श आदिभ्योऽच् ।"५।२।१२७। इति अच् ।) वटलकुचादिपत्त्रेषु क्रिमिभिरूर्णायाः कृतत्वात् पत्त्रसम्बन्धिनी ऊर्णा अत्रेति । इति भरतः ॥ धौतकौषेयम् । इत्यमरः ।२।६।११३ ॥ (यथा, महाभारते । १३ । १११ । १०३ ।

"पत्त्रोर्णं चोरयित्वा तु क्रकरत्वं नियच्छति ॥")

पत्रोर्णः, पुं, (पत्त्रेषु ऊर्णा यस्य ।) शोणाकवृक्षः । इत्यमरः । २ । ४ । ५६ ॥

पत्सलं, क्ली, (पतति गच्छति अस्मिन् । पत्लृ गतौ + "पते रख लः ।" उणां । ३ । ७४ । इति सरन् रस्य लश्च ।) पन्थाः । इत्युणादिवृत्तिः ॥

पथ, ई क गत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) ई क, पन्थयति । इति दुर्गादासः ॥

पथ, ए ज गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । ज्वलादिः ।) ए, अपथीत् । ज, पाथः पथः । इति दुर्गादासः ॥

पथः, पुं, (पथति गच्छति अत्र । पथ गतौ + घञर्थे अधिकरणे कः ।) पन्थाः । इति त्रिकाण्डशेषः ॥

पथन्, [न्] पुं, पथः । इत्यमरटीका ॥ (पथति गच्छति । पथ गतौ + शक् ।) गमनकर्त्ता च ॥

पथिकः, त्रि, पन्थानं गच्छति यः । (पथिन् + "पथः ष्कन् ।"५ । १ । ७५ । इति ष्कन् षो ङीषर्थः ।) पथगन्ता । (यथा, गोः रामायणे । १ । ५ । १० ।

"नानापथिकदूतैश्च वणिग्भिश्चोपशोभिताम् । देवतायतनैश्चैव विमानैरिव शोभिताम् ॥")

तत्पर्य्यायः । अध्वनीनः २ अध्वगः ३ अध्वन्यः ४ पान्थः ५ । इत्यमरः । २ । ८ । १७ ॥ गन्तुः ६ यातुः ७ पथकः ८ यात्रिकः ९ यात्रकः १० । इति शब्दरत्नावली ॥ पथिलः ११ । इत्युणादिकोषः ॥

पथिकसन्ततिः, स्त्री, (पथिकानां सन्ततिः समूहः ।) पथिकसङ्घः । तत्पर्य्यायः । हारिः २ । इति त्रिकाण्डशेषः ॥ पथिकसंहतिः ३ । इति हारावली ॥

पथिका, स्त्री, (पथिक + टाप् ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥

पथिद्रुमः, पुं, (पथिः प्रशस्तगुणो द्रुमः । बहुगुणवत्त्वात्तथात्वम् ।) खदिरवृक्षः । इति जटाधरः ॥ श्वेतखदिरः । इति राजनिर्घण्टः ॥

पथिलः, त्रि, (पथति गच्छतीति । पथ गतौ + "मिथिलादयश्च ।" उणां । १ । ५८ । इति निपातनात् साधुः ।) पथिकः । इत्युणादिकोषः ॥

पथिवाहकः, त्रि, (पन्थानं वाहयतीति । वह + णिच् + ण्वुल् ।) शाकुनिकः । निष्ठुरः । इति शब्दमाला ॥ भारवाहकश्च ॥

पथ्यं, त्रि, (पथिन् + "धर्म्मपथ्यर्थन्यायादनपेते ।" ४ । ४ । ९२ । इति यत् ।) चिकित्सादौ हितकारकम् । तत्पर्य्यायः । करणम् २ हितम् ३ । इति शब्दचन्द्रिका ॥ आत्मीयम् ४ आयुष्यम् ५ । सैन्धवे क्ली । इति राजनिर्घण्टः ॥

पथ्यः, पुं, (पथि साधुः । दिगादित्वात् यत् इनो-लोपः ।) हरीतकीवृक्षः । यथा,—

शिवायां वणतिक्तः स्यात् पथ्यः सुन्दरमालकौ ।"

इति शब्दमाला ॥

पथ्यशाकः, पुं, (पथ्यं हितकरं शाकं यस्य ।) तण्डुलीयशाकः । इति राजनिर्घण्टः ॥

पथ्या, स्त्री, (पथ्य + टाप् ।) हरीतकी । (यथा, हठयोगदीपिकायाम् । ३ । ३५ ।

"ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् । पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥")

म्टगेर्व्वारुः । चिर्भिटा । वन्ध्या कर्कोटकी । इति राजनिर्घण्टः ॥ (संसाररोगस्य पथ्यस्वरूपत्वात् गङ्गापि पथ्यस्वरूपा । यथा, काशीखण्डे २९ । ११२ ।

"पद्मनाभपदार्घ्येषा प्रसृता पद्ममालिनी । परर्द्धिदा पुष्टिकरी पथ्या पूर्त्तिः प्रभावती ॥")

पथ्यादिगुग्गुलुः, पुं, (पथ्या आदिर्यस्य तथाविधः गुग्गुलुः ।) औषधविशेषः । यथा,—

"पथ्या विभीतामलकीफलानां
शतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तञ्च पलङ्कषायाः
द्रोणे जले संस्थितमेकरात्रम् ॥
अर्द्धावशेषं कथितं कषायं
भाण्डे पचेत्तत् पुनरेव लौहे ।
अग्नौ वह्निरवतार्य्य दद्यात्
द्रव्याणि संचूर्ण्य पलार्द्धकानि ॥
विड़ङ्गदन्तीत्रिफलागुड़ूची-
कृष्णात्रिवृन्नागरकोषणानि ।
यथेष्टचेष्टस्य नरस्य शीघ्रं
हिमाम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
मधप्रसर्पी नूतनखञ्जताश्च ।
प्लीहानमुग्रं जठरार्त्तिगुल्मं
पाण्डुत्वकण्डुत्वविवातरक्तम् ॥